तप्तकृच्छ्रं पराकञ्च चान्द्रायणमनुक्रमात् ।"
अन्यासां सुराणां क्रमेण प्रायश्चित्तत्रयं न स्यात् ।
तथा भविष्ये ।
"सुरा तु पैष्टी मुख्योक्ता न तस्यास्त्वितरे समे ।"
पैष्टीति तण्डुलविकारमात्रोपलक्षणं इतरे गौड़ीमाध्व्यौ अतोऽन्नविकार एव सुराशब्दस्य मुख्यत्वात् त्रिविधा सुरेति गौड़ीमाध्व्योर्गौण-सुरात्वज्ञापनार्थम् । तेन एतत्पानेऽपि महापातकत्वमतिदिशति यथैवैका तथा सर्व्वा इति पैष्ट्यां पूर्ब्बप्रसिद्धिं दर्शयति । यथा पैष्टी सुरा तथा सर्व्वा गौड़ी माध्वी चेति पूर्व्ववचनोक्ता तु पैष्टी दृष्टान्तत्वेनात्र दर्शिता । न पातव्या द्विजोत्तमैरिति ब्राह्मणैरित्यर्थः । त्रैवर्णिकपरत्वे उत्तमपदानर्थक्यात् बहुवचनानर्थक्यपरीहारार्थमुत्तमप्रातिपदिकानर्थक्यमयुक्तं अतो ब्राह्मणस्य त्रिविधैव सुरा महापातकहेतुः । क्षत्रियवैश्ययोस्तु सुरा वै मलमन्नानामिति वचनेन पैष्टैव इति स्थितम् । अतएव ।
"एका माध्वी च गौड़ी च पैष्टी च त्रिविधा सुरा ।
द्विजातिभिर्न पातव्या कदाचिदपि कर्हिचित् ॥"
इति यमवचने द्विजातिपदं ब्राह्मणपरमेव । अत एव द्विविधसुरापाने न क्षत्रियादीनां महापातकम् ॥*॥ तावदस्तु । दोषाभावमेवाह हृदयाज्ञवल्क्यः ।
"कामादपि हि राजन्यो वैश्यो वापि कथञ्चन ।
मद्यमेव सुरां पीत्वा न दोषं प्रतिपद्यते ॥"
तदेवं पैष्टीनिषेधस्त्रैवर्णिकानां गौड़ीमाध्वीनिषेधस्तु ब्राह्मणानामेव । * । तज्जातिः स्त्रीणामपि सुरापाननिषेधः । यथा भविष्ये ।
"तस्मान्न पेयं विप्रेण सुरा मद्यं कथञ्चन ।
ब्राह्मण्यापि न पेया वै सुरा पापभयावहा ॥"
"या ब्राह्मणी सुरापी स्यात्
न तां देवाः पतिलोकं नयन्ति ॥"
इति श्रुतिः ॥
"पतत्यर्द्धशरीरेण भार्य्या यस्य सुरां पिवेत् ।
पतितार्द्धशरीरस्य निष्कृतिर्नोपपद्यते ॥"
न चैवं क्षत्रियवैश्यस्त्रीणामनिषेधः । ब्राह्मणीपदस्य निषिद्धसुरापानकर्त्तृभार्य्योपलक्षणत्वाद्-भार्य्या यस्य सुरां पिवेदिति सामान्यश्रवणाच्च । पानञ्च द्रवीभूतस्याभ्यवहारः । स च कण्ठदेशादधोनयनं न तु वक्त्रमात्रप्रवेशः । निष्ठीवनार्थं कपोलधारणे पानशब्दप्रसङ्गात् । यथोक्तम् ।
"जिघ्रन्नपि सुरां कश्चित् पिबतीत्यभिधीयते ।
यावन्न क्रियते वक्त्रे गण्डूषस्य प्रवेशनम् ॥"
अत्र गण्डूषप्रमाणं अविवक्षितम् । गण्डूषार्द्धपानेऽपि लोके पानशब्दप्रयोगात् । अतएव मुखप्रवेशनं अत्राविवक्षितं किन्तु मुखप्रवेशे कण्ठादधोनयनं भवति अतस्तदेवोपलक्षयति । अतएव ओष्ठमात्रलेपे न पाननिष्पत्तिः । अतस्तत्रोत्तमाङ्गस्पर्शप्रायश्चित्तम् ॥ * ॥
अथ सुरापानप्रायश्चित्तम् । तत्र मनुः ।
"सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिवेत् ।
तया सकाये निर्दग्धे मुच्यते किल्विषात्ततः ॥
गोमूत्रमग्निवर्णं वा पिवेदुदकमेव वा ।
पयो घृतं वामरणात् गोशकृद्रसमेव वा ॥"
अग्निवर्णां अग्निसमस्पर्शाम् । पयो घृतं गोरेव आदावन्ते च गोः कीर्त्तनात् । मोहशब्दोऽत्र बुद्धिपरः । देवलः । सुरापाने ब्राह्मणो रूप्यताम्रसीसकानामन्यतममग्निकल्पं पीत्वा शरीरत्यागात् पूयते । रूप्यादयोऽत्र द्रवीभूताः पीत्वेति निर्द्देशात् । स्वयमशक्तावन्यैरपि मुखे सेचनीया । यथा गौतमः । सुरापस्य ब्राह्मणस्य उष्णामासिञ्चेयुः सुरामास्ये मृतः शुध्येत । अतएव न सेचकानां वधो विहितत्वात् स्वयं पान इव । एतच्च मरणप्रायश्चित्तं कामकृते । यथा, वृहस्पतिः ।
"सुरापाने कामकृते ज्वलन्तीं तां विनिःक्षिपेत् ।
मुखे स हि विनिर्द्दग्धो मृतः शुद्धिमवाप्नुयात् ॥"
कथञ्चिदिति सकृदित्यर्थः । अङ्गिराः ।
सुरापानं सकृत् कृत्वा योऽग्निवर्णां सुरां पिवेत् ।
स पावयेदथात्मानमिह लोके परत्र च ॥"
भविष्ये ।
"मतिपूर्ब्बं सुरापाने प्राणान्तिकमुदाहृतम् ।
पैष्टीपाने तु ऋषिभिर्नेतरासां कथञ्चन ॥
शुद्धेनापि महाबाहो ! प्रायश्चित्तमुदाहृतम् ।
सुरायाः कामतः पाने मुख्यायाः प्राणनाशनम् ॥"
पुनःपुनःपैष्टीविषयत्वाभिधानम् । त्रिविधा सुरा मुख्या इति भ्रमनिरासार्थम् । कथञ्चन सकृदित्यर्थः । * । इतरासां असुराणां गौड़ीमाध्वीप्रभृतीनां ज्ञानतः सकृत्पाने मरणान्तिकं न भवति गौड़ीमाध्व्योस्तु ज्ञानतोऽभ्यस्तपाने गौड़ीमाध्वीव्यतिरिक्तायास्त्वसुराया अत्यन्ताभ्यस्तपाने मरणमुक्तं भविष्ये ।
"गौड़ीमाध्व्योस्तथाभ्यासे प्राणान्तिकमुदाहृतम् ।
अभ्यासे त्वसुरायास्तु तामेवाग्निनिभां पिवेत् ॥"
तथेति ज्ञानत इत्यर्थः । अतएव ।
"असकृत् ज्ञानतः पीत्वा वारुणीं पतति द्विजः ।
मरणं तस्य निर्द्दिष्टं प्रायश्चित्तं विधीयते ॥"
इति यमवचनमपि एतद्विषयमेव अत्राभ्यासे मरणविधानात् द्वितीयवार एव मरणं कार्य्यम् । गौड़ीमाध्व्योः कामतः सकृत्पाने भविष्ये ।
"असुरामद्यपाने तु कृते विप्रस्तु कामतः ।
चान्द्रायणं समभ्यस्येत् शुद्धिकामः स्वशुद्धये ॥
यद्यास्मिन्नेव विषये मानवीयं प्रकल्पयेत् ।
कणान् वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि ॥
सुरापानापनुत्यर्थं वालवासा जटी ध्वजी ।"
पिण्याकं खलिम् ॥ * ॥ उत्तमसुरापानं आयसेन पात्रेण इत्याह यमः ।
"आयसे भाजने तप्तां ब्राह्मणीं वारुणीं पिवेत् ॥"
गोवालचीरवाससा ततः कर्त्तव्यं आह उशनाः । गोवालचीरवासाः सुरापः सुरामग्निवर्णां पीत्वा पूतो भवति ॥ * ॥ अज्ञानतः सकृत्-पैष्टीपाने ब्राह्मणस्य द्वादशवार्षिकम् । यथा ब्रह्महत्याव्रतानुवृत्तौ यमः ।
"चरेतामेतदेवोभौ सुरापसुतलपगौ ।
सगोत्राद्गुरुकश्चैव सुवर्णस्तेयिकस्तथा ॥"*॥
भविष्ये ।
"अकामतः सुरां पीत्वा पैष्टीं मतकुलनन्दन ! ।
कृच्छ्रातिकृच्छ्रौ कृत्वा वै पुनःसंस्कारतः शुचिः ॥
कणान् वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि ।
सुरापानापनुत्यर्थं वालवासा जटी ध्वजी ॥"
सुरापानमात्रापनेयरोगस्य रोगिणोऽज्ञानतः पानविषयमिदं इत्युक्तं भविष्ये । यथा,—
"तथास्मिन्नेव विषये व्याधितं परिकीर्त्तितम् ।
यदि रोगैर्भवेद्ग्रस्तो नेतरस्य कदाचन ॥
कृच्छ्रचान्द्र सुरश्रेष्ठ ! तप्तकृच्छ्र उदाहृतः ।"
कृच्छ्रातिकृच्छ्रविधाने कृच्छ्रपदं न प्राजापत्यपरं किन्तु तप्तकृच्छ्रपरम् । * । अज्ञानतो गौड़ीमाध्व्योः सकृत्पाने उक्तं भविष्यपुराणे ।
"सकृत् पीत्वा तथा गौड़ीमज्ञानात् सुरसत्तम ! ।
कृच्छ्रातिकृच्छ्रौ विहितौ घृतप्राशनमेव च ॥"
अज्ञानाभ्यासे तत्रैवोक्तम् ।
"गौड़ीमज्ञानतः पीत्वा ब्राह्मणो ब्राह्मणप्रिय ! ।
तप्तकृच्छ्रन्तु वै कृत्वा पुनःसंस्कारतः शुचिः ॥
माध्वीं पीत्वा महाबाहो ! अज्ञानाद् द्विजसत्तमः ।
शुद्ध्येत तप्तकृच्छ्रेण विकर्म्माभ्यासगस्तथा ॥
रेतोमूत्रपुरीषाणां गौड़ीमाध्व्योश्च प्राशने ।
क्रव्यादपशुविष्ठानां संस्काराच्छुद्धिरिष्यते ॥"
प्राणान्तिके च पादहानेरसम्भवात् क्षत्रियवैश्ययोरपि यथोक्तं मरणान्तिकं प्रायश्चित्तमेव । द्वादशवार्षिकादौ पादपादहानिरभक्ष्यभक्षणे क्षत्रियादीनां ह्रासदर्शनात् ।
"विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम् ।
वैश्येऽर्द्धं पादमेकन्तु शूद्रजातिषु शस्यते ॥"
पानसादिमद्यपाने तु कामकृतानेकसमयाभ्यस्ते प्राणान्तिकं युक्तं ब्राह्मणस्य कामतया सकृत्कृते तु पराशरः ।
"अगम्यागमने चैव मद्यगोमांसभक्षणे ।
शुद्ध्येच्चान्द्रायणं कुर्य्यात् नदीं गत्वा समुद्रगाम् ॥
चान्द्रायणे ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम् ।
अनडुत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम् ॥"
अकामतः सकृत्पाने विष्णुः ।
"पीत्वा प्रमादतो मद्यमतिकृच्छ्रं चरेद्द्विजः ।
कारयेत् पुनःसंस्कारं भक्त्या विप्रांश्च भोजयेत् ॥"
कामतोऽकामतश्चाभ्यासे व्रतान्तरमाह यमः ।
"गोव्रतद्विहितः कृच्छ्रचान्द्रायणमथापि वा ।
अभ्यासे तु तयोर्भूयस्ततः शुद्धिमवाप्नुयात् ॥"
अपर्य्युषितपानसादौकादशविधमद्यपाने त्रिरात्रम् । पानसं द्राक्षमाधूकमित्याद्यभिधाय पुलस्त्यः ।
"द्राक्षेक्षुटङ्कखर्ज्जूरपनसादेश्च यो रसः ।
सद्योजातन्तु तं पीत्वा त्र्यहात् शुद्ध्येत् द्विजोत्तमः ॥"